National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(61): 76-78
© 2025 NJHSR
www.sanskritarticle.com

**Priyanka Panda**
Research Scholar,
Dept. Of Sahityam,
National Sanskrit University,
Tirupati

**Correspondence:**
**Priyanka Panda**
Research Scholar,
Dept. Of Sahityam,
National Sanskrit University,
Tirupati

# आधुनिकसंस्कृतसाहित्यलघुकाव्येषु आचार्यव्रजकिशोरनायकवर्याणां योगदानम्

**प्रियङ्का पण्डा**

**उपोद्घातः**

संस्कृतसाहित्ये काव्यं भागद्वयेन विभज्यते। १.श्रव्यकाव्यं २.दृश्यकाव्यम्। आलङ्कारिकशिरोमणिना विश्वनातकविराजेनोक्तम्-"**दृश्यश्रव्यभेदेन पुनः काव्यं द्विधा मतम्**"[1] इति। श्रव्यकाव्यस्य भेदेषु पद्यकाव्यं प्रमुखमस्ति। पद्यकाव्यानि त्रिधा विभक्तानि। तानि-१.महाकाव्यानि २.खण्डकाव्यानि ३.कोशः। सर्गबन्धात्मकं, पञ्चसन्धियुक्तं, विविधवर्णनैर्युक्तं, राकेन अङ्गिरसेन विविर्धैरङ्गरसैश्च युक्तं महाकाव्यम्। "**खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च**"[2] इति विश्वनाथेनोक्तं खण्डकाव्यस्य लक्षणम्। कालिदासस्य मेघदूतम् खण्डकाव्यस्य उदाहरणम्। परस्परापेक्षरहितः श्लोकसमूहः कोशः इति विश्वनाथस्य अभिप्रायः। अतः मुक्तककाव्यानि कोशविभागे पतन्ति। खण्डकाव्यानां, मुक्तककाव्यानां च अपरं नाम लघुकाव्यम्। केचन लाक्षणिकाः लघुकाव्यानि क्षुद्रकाव्यानिति वदन्ति। अत्र क्षुद्र इति पदस्य अर्थः न तु नीच इति। परन्तु परिमाणे अर्थात् श्लोक संख्यायाम् लघु भवन्ति। अतः लघुकाव्यानि अनुदात्तानिति न चिन्तनीयम्। पाठकानां मनोरञ्जनाय यथा महाकाव्यानि समर्थानि तथा लघु लघुकाव्यानां समर्थान्येव। आधुनिक साहित्यज्ञाः लघुकाव्यानि गीतिकाव्यान्यपि वदन्ति। लघुकाव्ययोः विभागः खण्डकाव्यविभागः अन्यः मुक्तकविभागः। लघुकाव्यं महाकाव्यात् परिमाणे अल्पं भवति। कवेः भावानुभूतेरेव कविना लघुकाव्यं आविष्क्रियन्ते। लघुकाव्यं भवति लाघुसंघटनाधारितं सर्वदा कदाचन लघुकाव्यानि केवलं प्रकृतिवर्णनविशिष्टाः भवन्ति। मेघसन्देशः, ऋतुसंहारः, गीतगोविन्दम् ईदृशान्येव काव्यानि। महाकाव्यात् लघुकाव्ये सर्गविभागो न दृश्यते।

लघुकाव्ये कविः एकमेववृत्तं स्वीकरोति। अत्र कविना रचितलघुकाव्येषु विशिष्ट-व्यक्तित्वानाम् विषये वर्णितम्। कोमलपदावलिः, सरसमधुराशब्दसंयोजना, भावानुगुण-भाषा, पदालालित्यं, स्वाभाविक आलङ्कारिकरचना, निसर्गसुन्दराश्चभावाः, विविधरसैः भरितं, सहजसुन्दरम् अभिव्यक्तीकरणम्, अल्पेपि काव्ये अनल्परसाभिव्यक्तिः, पात्राणां सजीव-चित्रणम् लघुकाव्येषु विद्यन्ते।

ओडिशादेशोऽयं एतादृश-रचनानां तथा कवीनां द्वारा धन्योऽस्ति। कवेः जन्म इतिहासप्रस्द्धे खोर्द्धामण्डले गोलवाईग्रामे जातम्। आचार्यः उत्कलप्रदेशस्य मूर्द्धन्यभूत आधुनिकसंस्कृतकाव्यकाररूपेण परिचितः। तस्य पिता हरिवन्धुः माता श्रीमती पद्मावती नामा। अस्य जन्मना पूतः विभूषितः स्ववंशः, देशश्च। आवाल्यादेव अध्ययन विषये अस्य प्रतिभा निरुपमाशोभते। बाल्ये पितुः सकाशात् चाणक्यनीति, श्रीमद्भगवद्गीता,व्याकरणं, पञ्चमहाकाव्यानि च अधीत्य अनन्तरं पुरीं गत्वा श्रीसदाशिवकेन्द्रियविशेव-विद्यालये साहित्यशास्त्रमनन्तरं व्याकरणशास्त्रमधीतवन्तः। मध्यप्रदेशस्य संस्कृत एकाडेमी १९८९ तमे वर्षे कविं राष्ट्रस्तरीयशास्त्रविमर्शप्रतियोगितायाम् सम्मानितवती। २००५ तमे अब्दे डिसेम्बरमासे दिल्लीसंस्कृत एकाडेमी कवेः ग्रन्तरचनाकौशलं पाण्डित्यं चानुभूय पुरस्काररुप्यकैः साकं उपढौनकप्रमाणपत्रादिभिश्च सप्रश्रयं सम्मानितवती। अध्यापनायाः प्रथम दिवसात् इदानीं यावदपि पठने

पाठने ग्रन्थनिर्माणे च तत्परो विद्यते। प्रथमतया पुरीस्थ वेदकर्मकाण्डमहाविद्यालये साहित्याधापकरूपेण, १९८२ तमे श्रीजगन्नाथसंस्कृतविश्वविद्यालये साहित्यविभागे अध्यापकरूपेण, अनन्तरं प्रफेसरमलंकृत्य प्रायशः पञ्चविंशति-वर्षाणि निरलसतया अध्यापनकर्मणि व्यपृतो नैकाम् शिष्यान् विर्मितवन्तः।

कवेः काव्यसङ्कलनग्रन्थेषु प्रमुखतया लघुकाव्यानि विराजन्ते। तेषु वियोगचन्द्रिका, देवीमहिमविलसितं, जानकीबल्लभचरितं, श्रीमज्ज-गद्गुरुशङ्कराचार्यस्नामिभारतीतीर्थविभूति - वैभवम् महत्त्वपूर्ण-रचनानि। सामाजिक-आध्यात्मिक दार्शनिक-राष्ट्रभक्ति सम्बन्धाश्च विषयाः वर्ण्यविषयत्वेन गृहीताः। कवेः पद्यरचना पाटवम् सरला भाषा, अलङ्कारयोजना, भक्तिपूर्ण, विप्रलम्भात्मकं, धर्मवीरत्वं, प्रकृतिचित्रण-नैपुण्यं, प्रसादगुणगुम्फितैश्च कविं आधुनिककविषु अग्रगण्यं निरुपयन्ति। वियोगचन्द्रिकायां कवेः पत्नीविरहात् विरहावस्था अत्यन्त आतुरतया विलापं वियोगिनी-च्छन्दसा वर्ण्यते। जीवनस्य मध्याह्ने घटितेन अनेन दुर्घटनेन कवेः मनः नितरां शोकोच्छ्वासेन विगलितमभूत्। यथा महाकवेर्वाल्मिकेः क्रौञ्च-मिथुनात् क्रौञ्च्याः क्रौञ्चस्य वा वियोगावस्थामवलोक्येदं प्राथम्येन कविता प्रादुर्बभूव तथैव कवेः कविताभावस्योपर्युक्तं दुर्घटनमेव वीजमस्ति। प्राणप्रियापत्नीविरहे तां जननीवत्सला, चित्तहारिणी, भामिनी, सुन्दरी आदिभिः शब्दैः व्याकुलतया स्मरन्ति।

विरहावस्थां श्लोकैः विरचितं कविना।

**स्मरतः सुगुणान् बहून् प्रिये**
**शतशो दूयत एव मे सतः।**
**हृदयं ज्वलति प्रदूषित-**
**मनिशं शं नहि लभ्यते क्वचित्॥**[3]

भगवतः परमशिवस्य सर्वासामभिवृद्धीनां कारमं भवति भगवती। शक्तेरनुभवः सर्वैः प्रत्यक्षतया क्रियते। तस्मात् शास्त्रेषु प्रचीनेषु शक्तिवादमुपजीव्यानेकानि स्तुतिपरकाणि काव्यानि विरचितानि दृश्यन्ते। तेषु कवयितृषु प्रमुखा भवन्ति भगवत्पादाः। प्रस्तुते 'देवीमहिमविलसितं' इति लघुकाव्येऽत्र ओडिशाप्रान्तीय-शक्तिपीठानां नामग्रहणपूर्वकं सरलभाषया, प्रसादगुणैः, चत्वारि छन्दांसि व्यवहृत्य पद्यानि विरचितानि बाहुल्येन वियोगिनाछन्दो व्यवहृतमस्ति। यथा-

**जयतान् मणिमाणिकेश्वरी**
**भवपत्नी सुपुरस्य जित्वरी**
**जयताद् भुवनेश्वरेश्वरी**
**मणिनागा रणपतनेश्वरी॥**[4]

राष्ट्रनेतृणां जीवनचरितवर्णनं संस्कृतसाहित्ये बहुप्राचीनकाला-दारभ्य प्रवर्तते। अत्र कविना रचितं जानकीबल्लभचरिते पूर्वतन-ओडिशाप्रदेशमुख्यमन्त्री, परवर्त्तीसमये आसामराज्य-राज्यपालः अनन्तरं संस्कृभाषानिष्णाणात् केन्द्रसर्वकारेण तिरुपतिस्थ राष्ट्रीयसंस्कृतविश्वविद्यालयस्य कुलाधिपतिरूपेण बहुविधा समुन्नतिं विदध्य स्वसंस्कृतज्ञानात् काव्यरचना, संस्कृतसभा, निखिलस्य संस्कृतभागवतस्य स्वमातृभाषया (ओडिआ) गद्यानुवादं, भर्त्तृहरि-शतकत्रयस्योत्कलभाषानुवादः तथा अन्येषां ग्रन्थानामपि संस्कृत-भाषयारचितानां मुखबन्धो लिखितः। ओडिशाप्रान्ते स्वीयमुख्य-मन्त्रित्वकाले पुण्यपूर्य्यां जगन्नाथराजधान्यां श्रीजगन्नाथसंस्कृत-विश्वविद्यालयं प्रतिष्ठापितवानिति महतो हर्षस्य विषयः। एष काव्यनेता उत्कलराजनीतौ चाणक्य इत्युच्यते। एतेषां महाभागानां जीवन-चरितं, कृतयः, राष्ट्रनेतृत्वं, पदव्यः, संस्कृतप्रेमं, उपलब्धयः श्लोकैः कविवरेण विरचितम्। यथा-

**केन्द्रस्य मन्त्रणगृहे निजकर्मदाक्ष्यं**
**नानागुरुत्वविषये बहुधा प्रदर्श्य।**
**कार्यं व्यधत्त बहुकालमयं जयन्त्या**
**सार्द्धं समुद्र इव शान्तवपुः प्रसन्नः॥**[5]

ख्रिष्टीयाष्टमशताब्द्यां केरलदेशे प्रादुर्भूतैरादित्यशङ्कराचार्यैर्भ-गवत्पादैः प्रतिष्ठापितेषु भारतवर्षस्य चतुसृषु दिक्षु चतुर्षु मठेषु शृङ्गगिरिश्थदक्षिणाम्नायमठोऽन्यतमः। सोऽयं मठो यजुर्वेदीयोऽस्ति। यस्य महावाक्यान् 'अहं ब्रह्मास्मि' भूर्भुवो गोत्रविशेषः। पुण्यपावने शारदापीठेऽत्यनतं शान्त सर्वविद्यानिष्णान्ताः गीर्वाणवाणी-भाषणोऽनर्गलं सुकुशलिनो जितेन्द्रिया यदिवरा जगद्गुरवो भारतीतीर्थमहाभागाश्चन्द्रशेखरभारतीनां प्रशिष्या अभिनवविद्या-तीर्थानां सुयोग्या अन्तेवासिनोऽधुना विधुशेखरस्वामीमहोदयेषु स्वीयशिष्यप्रवरेषु मठीयं निखिलं दायित्वं समारोप्य ध्यानरता अनारन्तं चकासति। महामान्या जगद्गुरवो भारतीतीर्थपादा न केवलं वेदवेदाङ्गवेदान्तादिशास्त्रनिष्णाता अपितु ते महाकवयो विद्यन्ते। तेषां रचना, गुणगान प्रशंसया कविना शताधिकं पद्यैः विरचितमिदं 'जगद्गुरुभारतीतीर्थविभूतिवैभवं'।

यथा-

**वाचामधीशस्य पदारविन्दं ध्यायंश्च काव्यं रचयन् मुदाहम्।**
**श्रीभारतीतीर्थमबोदयेभ्यस्समर्पयंस्तत्सुखमावहामि॥**[6]

**उपसंहारः-**

उपरोक्त विवरणेन तथा कवेः काव्यविषयचयनं प्रतिभाति। यथा- राष्ट्रनेता, पत्नीवियोगः, देवीभक्तिः, जगद्गुरुभारतीतीर्थविभूति-वैभवम् रूपेण आध्यत्मिकता आदयः। अत्र काव्यप्रतिभा, सामाजिकता, भक्तिभावना आदि कविना स्व-रचितलधुकाव्यैः संस्कृतसाहित्यवाङ्मयं प्रति स्व-अवदानं समर्प्यते इति ज्ञायते।

**संदर्भ-ग्रन्थाः -**

1. व्रजमाधुरी

**2.** जानकीबल्लभचरितम्

**3.** वियोगचन्द्रिका

**4.** देवीमहिमविलसितम्

**5.** जगद्गुरुभारतीतीर्थविभूतिवैभवम्

**उपयुक्तग्रन्थसूची :-**

1. साहित्यदर्पणम्।

2. संस्कृतसाहित्येइतिहास।

**पाद टिप्पणी :-**

[1]साहित्यदर्पणम्.६.१

[2]साहित्यबर्पणम्.६.३

[3]वियोगचन्द्रिका-श्लो.३

[4]देवीमहिमविलसितम्-श्लो.२८

[5]जानकीबल्लभचरितम्.श्लो.१०४

[6]जगद्गुरुभातीती